Rāmatāpanīyopanishad.

Skr. 31 (Haug 35, 24).

Saṃnyāsopanishad, fol. 45 b 2. Die Entsagung aller Dinge. Beginnt: अथाहिताग्निर्म्रियेत प्रेतस्य मन्त्रैः संस्कारोपतिष्ठते । स्वस्थो वाश्रमपारं गच्छेयमिति । एतान्पितृमेधकामो विधिवत्संभारान्संभृत्यारण्ये गत्वामावास्यायां प्रातरेवान्ते ऽग्निमुपसमाधाय पितृभ्यः श्राद्धतर्पणं कृत्वा ब्रह्मेष्टिं निर्वपेत् ॥

Gedruckt in Upanishadāṃ Samuccayaḥ mit dem Commentar von Nārāyaṇa, p. 551. Übersetzt von Deussen l. l. p. 686. Dazu

186 (Skr. 122 b, Haug 245).

Saṃnyāsopanishad. Dasselbe Thema in 2 Adhyāyāḥ behandelt. Beginnt: अथातः संन्यासोपनिषदं व्याख्यास्यामः । यो ऽनुक्रमेण संन्यस्यति स संन्यस्तो भवति । को ऽयं संन्यास उच्यते कथं संन्यस्तो भवति । य आत्मानं क्रियाभिर्गुप्तं करोति मातरं पितरं भार्यां पुत्रान्बन्धूननुमोदयित्वा ये चास्यर्त्विजस्तान्सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरेष्टिं निर्वपेत् etc. Sieh Kaṇṭhaçrutyupanishad.

Schliesst: यस्तु द्वादशसाहस्रं प्रणवं जपते ऽन्वहम् । तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥

Skr. 31 (Haug 35, 41).

Sarvopanishatsāra, fol. 103b 6. Die Grundzüge des Vedānta (Samastavedāntasārasiddhāntārtha). Beginnt: कथं बन्धः कथं मोक्षः का विद्या का विद्येति जाग्रत्स्वप्नसुषुप्तं तुरीयं च कथम् । अयमन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयः कथम् । कर्ता जीवः क्षेत्रज्ञः साक्षी कूटस्थो ऽन्तर्यामी कथम् । प्रत्यगात्मा परमात्मात्मा माया चेति कथम् ॥ etc.

Gedruckt mit dem Commentar von Nārāyaṇa in Upanishadāṃ Samuccayaḥ, p. 587. Übersetzt von Deussen l. l. p. 622.

Skr. 31 (Haug 35, 42).

Haṅsopanishad, in 2 Khaṇḍa, fol. 105b 7. Eine Yoga-Upanishad, übersetzt von Weber, Indische Studien 1, 385, und von Deussen l. l. p. 673. Beginnt: गौतम उवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद । ब्रह्मविद्याप्रबोधो हि केनोपायेन जायते ॥ सनत्सुजात उवाच ॥ विचार्य सर्ववेदेषु मतं ज्ञात्वा पिनाकिनः । पार्वत्या कथितं तत्त्वं शृणु गौतम तन्मम ॥ अनाख्येयमिदं गुह्यं योगिनां (yoginī Hs.) कोशसंनिभम् । हंसस्य गतिविस्तारं भुक्तिमुक्तिफलप्रदम् ॥

Gedruckt in Upanishadāṃ Samuccayaḥ mit den Commentaren von Nārāyaṇa und Çaṃkarānanda (bei welchem diese drei Çlokāḥ fehlen), p. 593. Übersetzt von Deussen l. l. p. 673.

185.

Skr. 122a (Haug 178—218).

181 Blätter. 17/29. 9 Zeilen. Schrift von c. 1864.

41 Upanishads. Erster Band einer aus Baroda stammenden Sammlung von 101 Upanishads. Vgl. Haug, Brahma und die Brahmanen S. 29—31. Der nachstehenden alphabetisch geordneten Beschreibung der 41 Upanishads sind auch Hinweise auf 186, 187 beigefügt, vgl. auch 184.

Skr. 122a (Haug 181).

Akshamālikopanishad Av., die Anfertigung von Rosenkränzen und die Belohnung für das Tragen derselben. Beginnt: अथ प्रजापतिर्गुहं पप्रच्छ । भो ब्रह्मन्नक्षमाला[भेद]विधिं ब्रूहीति । सा किंलक्षणा कति भेदा अस्याः कानि सूत्राणि कथं घटनाप्रकारः के वर्णाः का प्रतिष्ठा कैषाधिदेवता किं फलं चेति ॥ Catal. IO. l. l. 85.

Skr. 122a (Haug 218).

Akshyupanishad. Nur die Entsagung jedes unnützen Umgangs und die Meditation an das höchste Wesen ist empfehlenswerth. Beginnt: अथ ह सांकृतिर्भगवानादित्यलोकं जगाम । तमादित्यं नत्वा

चाक्षुमतीविद्यया तमस्तुवत् । ओं नमो भगवते श्रीसूर्यायाक्षितेजसे नमः । ओं खेचराय नमः । ओं महासेनाय नमः । ओं तमसे नमः । ओं रजसे नमः । ओं सत्त्वाय नमः । असतो मा सद्गमय तमसो ज्योतिर्गमय मृत्योर्माऽमृतं गमय । उषमो*) भगवाञ्छुचिरूप । हंसो भगवाञ्छुचिरूप (beidemal Hs. çucīrūpaḥ) प्रतिरूपः *। एवं चाक्षुष्मतीविद्यया स्तुतः सूर्यनारायणः सुप्रीतो ऽब्रवीत् । **विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतिरूपं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः पुरुषः प्रजानामुदयत्येष सूर्यः । ओं नमो भगवते श्रीसूर्यायादित्यायाक्षितेजसे होवाहिनी वाहिनी वा स्वाहेति ॥ Hierher gehört चाक्षुमतीविद्यां ब्राह्मणो यो नित्यमधीते न तस्याक्षिरोगो भवति न तस्य कुले ऽन्धो भवति ॥ Mit dem Auge ist das Geistige gemeint, daher der Name der Upanishad. In dem Satze: „aus dem Unwirklichen bringe mich zur Wirklichkeit, aus der Finsterniss bringe mich zum Lichte, aus dem Tode bringe mich zur Unsterblichkeit“ liegt der Grundgedanke des Ganzen. Vgl. I. 1. 90.

Skr. 122 a (Haug 186).

Adhyātmopanishad. Nach dem Schlusse aus dem Himavatkhaṇḍa (des Skandapurāṇa). Nārāyaṇanāradasaṃvāda. Diese Upanishad zählt eine grosse Anzahl von Tīrtha auf, in denen der Yogin sich entweder wirklich oder in Gedanken**) baden soll. Diese Tīrtha stellen einen oder den anderen Theil des Leibes des Badenden dar. Beginnt: सप्त पुर्यस्त्रयो ग्रामा नवारण्या नवौ परः (die letzten 3 Wörter fehlerhaft) । चतुर्दशैव गुह्यानि मुक्तिद्वाराणि भूतले ॥ अयोध्या मथुरा गया काशी कान्ती अवन्तिका । पुरी द्वारवती ज्ञेया सप्तैते मुक्तिदायकाः ॥ शालिग्रामो महायोगे शम्भले हरिमन्दिरे । नन्दिग्रामः (नन्दी° Hs.) कौशले तु त्रयो ग्रामाः प्रकीर्तिताः ॥ अथारण्यानि । दण्डकं सैन्धवारण्यं जम्बुमार्गं च पुष्करं । उत्पलावर्तमरण्यं नैमिषं कुरुजाङ्गलम् । अर्बुदं हिमवन्तं च नवारण्यानि वै विदुः ॥ etc.

Eine mehr genuine Adhyātmopanishad ist in Skr. 122 c (Haug 236) gegeben.

Skr. 122 a (Haug 189).

Anubhavasāropanishad. Beginnt: अथातो ब्रह्मनिष्ठानां योगिनां मुक्तानां परमहंसानामवधूतानां को ऽयं मार्गः का स्थितिरिति दत्तात्रेयो

*) Der mit * bezeichnete Satz, und das mit ** Bezeichnete bis svāheti leidet an manchen Fehlern.

**) एतेषां स्मृतिमात्रेण सर्वं स्नानफलं लभेत् ॥

दक्षिणामूर्तिं पप्रच्छ । सहजानन्दं परमेष्ठिनं परापरं परिसमेत्योवाच । संधिरेवा (रवा Hs.) निश्चलं निष्कलं कम्पपरापरं भव्यभवादिशून्यं निरामयं निर्मलं नित्यमुक्तमानन्दरूपं निरतविनोदं (निरतं Hs.) सदाशिवं स्वात्मसुधाब्धिपूर्णं स एवात्मा निजनिश्चयेति ॥ etc.

Schliesst: ब्रह्मैवाहमस्मि परं ब्रह्मैवाहमस्मि (परं ब्रह्मैवावहहमस्मि) । पूर्णमूर्ध्वमधः पूर्णमन्तर्बहिःसमम् । निर्वाणनिर्भरं पूर्णं पूर्णलक्ष्यं विधीयते ॥

Diese Upanishad findet sich in keiner anderen Sammlung. Deshalb konnten die Fehler der Hs. nicht verbessert werden.

Skr. 122a (Haug 204).

Annapūrṇopanishad. In 5 Adhyāyāḥ. Der Grundgedanke dieser Upanishad ist im folgenden Çloka ausgesprochen, fol. 2b 7: नित्योदितं विमलमाद्यमनन्तरूपं ब्रह्मास्मि नेतरकलाकलनं हि किंचित् । इत्येव भावय निरञ्जनतामुपेतो निर्वाणमेहि सकलामलशान्तवृत्तिः ॥

Adhyāya 1 beginnt: निदाघो नाम योगीन्द्र ऋभुं ब्रह्मविदां वरम् । प्रणम्य दण्डवद्भूमावुत्थाय स पुनर्मुनिः ॥ आत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम् । कयोपासनया ब्रह्मन्नीदृशं प्राप्तवानसि । तां मे ब्रूहि महाविद्यां मोक्षसाम्राज्यदायिनीम् ॥ (ऋभुरुवाच) ॥ निदाघ त्वं कृतार्थो ऽसि शृणु विद्यां सनातनीम् । यस्या विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि ॥ मूलशृङ्गाटमध्यस्था बिन्दुनादकलाश्रया । नित्यानन्दा निराधारा विख्याता विलसत्कचा । विष्टपेशी महालक्ष्मीः कामस्तारो न(र?)तिस्तथा ॥ भगवत्यन्नपूर्णेति ममाभिलषितं ततः । अन्नं देहि ततः स्वाहा मन्त्रसारेति विश्रुता । सप्तविंशतिवर्णात्मा योगिनी गणसेविता ॥ ऐं ह्रीं सौं श्रीं क्लींमें नमो भगवत्यन्नपूर्णे ममाभिलाषितमन्नं देहि स्वाहा । इति पित्रोपदिष्टो ऽस्मि तदादिनियमस्थितः । कृतवान्स्वात्माचारो मन्त्रानुष्ठानमन्वहम् ॥ एवं गते बहुदिने प्रादुरासीन्ममाग्रतः । अन्नपूर्णा विशालाक्षी स्मयमानमुखाम्बुजा ॥ तां दृष्ट्वा दण्डवद्भूमौ नत्वा प्राञ्जलिरास्थितः । अहो वत्स कृतार्थो ऽसि वरं वरय मा चिरम् ॥ एवमुक्तो विशालाक्ष्या मयोक्तं मुनिपुंगव । आत्मतत्त्वं मनसि मे प्रादुर्भवतु पार्वति ॥ तथैवास्त्विति मामुक्त्वा तत्रैवान्तरधीयत । तदा मे मतिरुत्पन्ना जगद्वैचित्र्यदर्शनात् ॥

Adhyāya 2 beginnt: निदाघः ॥ सङ्गः कीदृश इत्युक्तः कश्च बन्धाय देहिनाम् । कश्च मोक्षाय कथितः कथं त्वेष चिकित्स्यते ॥ देहदेहिविभागैकपरित्यागेन भावना । देहमात्रे हि विश्वासः सङ्गो बन्धाय कथ्यते ॥ सर्वमात्मेदमत्राहं किं वाञ्छामि त्यजामि किम् ।

इत्यसङ्गस्थितिं विद्धि जीवन्मुक्ततनुस्थिताम् ॥ नाहमस्मि न चान्यो ऽस्ति न चायं न च नेतरः । सो ऽसङ्ग इति संप्रोक्तो ब्रह्मास्मीत्येव सर्वदा ॥

Adhyāya 3 beginnt: विदेहमुक्तेः किं रूपं तद्वान्को वा महामुनिः । कं योगं समुपस्थाय प्राप्तवान्परमं पदम् ॥ सुमेरोर्वसुधापीठे माण्डव्यो नाम वै मुनिः । कौण्डिन्यात्तत्त्वमास्थाय जीवन्मुक्तो भवत्यसौ ॥

Adhyāya 4 beginnt: जीवन्मुक्तस्य किं लक्ष्म ह्याकाशगमनादिकम् । तथा चेन्मुनिशार्दूल तच नैव प्रलक्ष्यते ॥ अनात्मविद्मुक्तो ऽपि नभोविहरणादिकम् । द्रव्यमन्त्रक्रियाकालशक्त्याप्नोत्येव स द्विजः ॥

Adhyāya 5 beginnt: गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतो ऽपि वा । न विचारपरं चेतो यस्यासौ मृत उच्यते ॥ सम्यग्ज्ञानसमालोकः पुमाञ्ज्ञेयः समः स्वयम् । न बिभेति न चादत्ते वैवश्यं न च दीनताम् ॥ अपवित्रमपथ्यं च विषसंसर्गदूषितम् । भुक्तं जरयति (चर° Hs.) ज्ञानी क्लिन्नं नष्टं च मृष्टवत् ॥ Vgl. Catal. IO. 1. 1. 88.

Skr. 122a (Haug 207).

Avadhūtopanishad. Der Asket, welcher die Fesseln der weltlichen Dinge abschüttelt, ist allein glücklich. Beginnt: अथ ह सांकृतिर्भगवन्तमवधूतं दत्तात्रेयं परिसमेत्य पप्रच्छ । भगवन्को ऽवधूतस्तस्य का स्थितिः किं लक्ष्म किं संसरणमिति । तं होवाच भगवो(?)दत्तात्रेयः परमकारुणिकः । अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारबन्धनात् । तत्त्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते ॥ यो विलङ्घ्याश्रमान्वर्णानात्मन्येव स्थितः सदा । अतिवर्णाश्रमी योगी अवधूतः स कथ्यते ॥ Zu vergleichen ist das Werk Ashṭāvakragītā und Catal. IO. 1. 1. 97.

Skr. 122a (Haug 180).

Avyaktanṛisiṅhopanishad, der aus nicht wahrnehmbarem Ursprung entstandene Nṛisiṅha schafft die Welt, die Götter, die vier Kasten, die vier Veden, alle Versmaasse. Er setzt Indra zum König des Himmels und der Erde ein. Die Belohnung derer, welche diese Upanishad lesen. Beginnt: पुरा किलेदं न किंचनासीन्न द्यौर्नान्तरिक्षं न पृथिवी केवलं ज्योतीरूपमनाद्यनन्तमनण्वस्थूलरूपमरूपं रूपवदविज्ञेयं ज्ञानरूपमानन्दमयमासीत् । तदनन्यत्तद्वेधाभूत् । हरितमेकं रक्तमपरम् । तत्र यद्रक्तं तत्पुंसो रूपमभूत् । यद्धरितं तन्मायायाः । तौ समागच्छतः । तयोर्वीर्यमेवमनन्दत् । तदवर्धत । तदण्डमभूद्धैमम् । तत्परिणममानमभूत् । ततः परमेष्ठी व्यजायत । सो ऽभिजिज्ञासत् । किं मे कुलं किं मे कृत्यमिति । तं ह वागदृश्यमानाभ्युवाच । भो भोः प्रजापते त्वम-

व्यक्ताद्रुत्पन्नो ऽसि व्यक्तं ते छात्यमिति । किमव्यक्तं यस्मादहमासिषं किं तद्व्यक्तं (tad vaktavyam Hs.) यन्मे छात्यमिति । सो ऽब्रवीत् । अविज्ञेयं हि तत्सौम्य तेजः । यदविज्ञेयं तदव्यक्तम् ॥ Catal. IO. 1. 1. 86.

Skr. 122a (Haug 206).

Ātmopanishad. Sieh o. S. 104.

Skr. 122a (Haug 198).

Ātmabodhopanishad oder *Ātmaprabodhopanishad.* In 2 Khaṇḍa. Im ersten wird Nārāyaṇa gepriesen. Beginnt: प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम् । अकार उकार मकार इति । त्र्यक्षरं (अक्षरं Hs.) प्रणवं तदेतदोमिति यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ओं नमो नारायणाय शङ्खचक्रगदाधराय । तस्मादों नमो नारायणायेति मन्त्रोपासको वैकुण्ठभवनं गमिष्यति । अथ यदिदं ब्रह्मपुरं पुण्डरीकं तस्मात् taḍid — ābhamātram दीपवत्प्रकाशम् ॥ So weit stimmt dieser Text mit dem fünften Khaṇḍa der Nārāyaṇopanishad.

Im zweiten Khaṇḍa identificirt sich der Yogin mit dem brahman (neutrum). Beginnt: प्रगलितनिजमायो ऽहं निस्तुलदृशिरूपवस्तुमात्रो ऽहम् । अस्तमिताहंतो ऽहं प्रगलितजगदीशजीवभेदो ऽहम् ॥ प्रत्यगभिन्नपरो ऽहं विध्वस्ताशेषविधिनिषेधो ऽहम् । समुदस्ताश्रमितो ऽहं प्रविततसुखपूर्णसंविदेवाहम् ॥ 1. 1. 493, 47. Übersetzt von Deussen p. 750.

Skr. 122a (Haug 217).

Ekāksharopanishad. Lobeserhebung von Nārāyaṇa. Er vereint in sich nicht allein alle Götter (मित्रः सुपर्णश्चन्द्र इन्द्रो वरुणो रुद्रस्त्वष्टा विष्णुः सविता गोपतिस्त्वम्), sondern auch er schafft alles Bestehende. Beginnt: एकाक्षरं त्वक्षरतो ऽसि सोमे सुषुम्नया चेह दृढो न एकः । त्वं विश्वभूर्भूतपतिः पुराणः पर्जन्य एको भुवनस्य गोप्ता ॥ विश्वे निमग्नः पदवीः कवीनां त्वं जातवेदो भुवनस्य नाथः । अजातमग्रे (?) स हिरण्यरेता यज्ञस्त्वमेवैकविभुः पुराणः ॥ 1. 1. 494, 87.

Skr. 122a (Haug 212).

Oṃkāropanishad. Dieses ist ein falscher Titel für die Nādabindūpanishad. Sieh o. S. 109.

Skr. 122a (Haug 210).

Kaṭhopanishad. Stimmt überein mit Catal. IO. 494, 101. Vgl. Kaṇṭhaçrutyupanishad. Die Obliegenheiten des den weltlichen Genüssen entsagenden Einsiedlers (Saṃnyāsin). Beginnt: देवा ह वै

भगवन्तमब्रुवन् । अधीहि भगवन्ब्रह्मविद्याम् । स प्रजापतिरब्रवीत् । सशिखान्केशान्निष्कृष्य विसृज्य यज्ञोपवीतं निष्कृष्य पुत्रं दृष्ट्वा त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वं स्वाहा त्वं स्वधा त्वं धाता त्वं विधाता त्वं त्वष्टा त्वं प्रतिष्ठासि ॥ Sieh Deussen l. l. p. 696.

Skr. 122a (Haug 183).

Kuṇḍalīkopanishad. Nachdem ein Brāhmaṇa die ersten drei Āçrama vollendet hat, entsagt er als Yati allem Weltlichen. Beginnt: ब्रह्मचर्याश्रमे क्षीणे गुरुशुश्रूषणे रतः । वेदानधीत्यानुज्ञात उच्यते गुरुणाश्रमी ॥ दारमाहृत्य सदृशमग्निमाधाय शक्तितः । ब्राह्मीमिष्टिं यजेत्तासामहोरात्रेण निर्वपेत् ॥ संविभज्य सुतानर्थे ग्राम्यकामान्विसृज्य च । संचरन्वनमार्गेण शुचौ देशे परिभ्रमन् ॥ वायुभक्षो ऽम्बुभक्षो वा विहितैः कन्दमूलकैः । स्वशरीरे समाप्याथ पृथिव्यां नाश्रु पातयेत् ॥ l. l. 92.

Skr. 122a (Haug 214).

Kaivalyopanishad (?). Sieh o. S. 106.

Skr. 122a (Haug 193).

Gaṇapatyupanishad. Cultus von Gaṇeça, und zuletzt Belohnung derer, die ihm huldigen. Beginnt: नमस्ते गणपतये त्वमेव प्रत्यक्षं तत्त्वमसि त्वमेव केवलं कर्तासि त्वमेव केवलं धर्तासि त्वमेव केवलं हर्तासि त्वमेव केवलं ब्रह्मासि त्वं साक्षादात्मासि । नित्यमृतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव दातारम् । अव श्रोतारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अव दक्षिणात्तात् । अव चोत्तरात्तात् । अवाधरात्तात् । अव चोर्ध्वात्तात् सर्वतो मां पाहि समन्तात् । त्वं वाङ्मयस्त्वं चिन्मयस्त्वमानन्दमयस्त्वं ब्रह्ममयस्त्वं सच्चिदानन्दाद्वितीयो ऽसि ॥ etc.

Die von Lalmitra Notices No. 1928 gegebene Gaṇeçopanishad weicht von der obigen nicht ab. Vgl. Catal. IO. l. l. 107.

Skr. 122a (Haug 195).

Cūlikopanishad. Sieh o. S. 107.

Skr. 122a (Haug 201).

Tārasāropanishad. Über die Formel *Oṃ Nārāyaṇāya namaḥ*, und im Anschluss daran eine Discussion über Om. Der erste Paragraph stimmt zum ersten der Jābālopanishad. Der zweite beginnt: अथ हैनं भरद्वाजः पप्रच्छ याज्ञवल्क्यम् । किं तारकं किं तारयतीति । स होवाच याज्ञवल्क्यः । ओं नमो नारायणायेति तारकं चिदात्मक-

मित्युपासितव्यम् । ओमित्येकाक्षरमात्मस्वरूपम् । [नम इति द्व्यक्षरं प्रकृतिस्वरूपम्] नारायणायेति पञ्चाक्षरं ब्रह्मस्वरूपम् । इति य एवं वद् सो ऽमृतो भवति ॥ Catal. IO. 1. 1. 109.

Skr. 122a (Haug 178).

Tripurātapanopanishad, in 5 Upanishad. In 1—4 wird die Tripurā gepriesen. In 5 wird die Erkenntniss des Brahman (n.) empfohlen. Beginnt: अथैतस्मिन्नन्तरे भगवान्प्राजापत्यं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधानभगवतीत्येवमादिशक्त्या भूर्भुवःस्वस्त्रीणि स्वर्गभूपातालानि त्रिपुराणि हरमायात्मकेन ह्रीकारेण हृल्लेखाख्या भगवती त्रिकूटावसाने निलये धाम्नि महसा घोरेण व्याप्नोति । सैवेयं भगवती त्रिपुरेयं व्यापद्यते ॥ Sieh Catal. IO. 1. 1. 98.

Skr. 122a (Haug 209).

Tripuropanishad. Eine Upanishad zur Verherrlichung der Göttin Tripurā. Beginnt: तिस्रः पुरस्त्रिपथा विश्वचर्षणीर्यचा(?) कथा अक्षराः संनिविष्टाः । अधिष्ठायैना अजरा पुराणि महत्तरा महिमा देवतानाम् ॥ नव योनिनवं (vielleicht yonīr) नव चक्राणि दीधिरे नवैव योगा नव योगिन्यश्च । नवानां चक्रे अधीनाथा स्योना नव भद्रा नव मुद्रा महीनाम् ॥ Der Text ist vielfach fehlerhaft. Sieh Catal. IO. 1. 1. 100.

Skr. 122a (Haug 188).

Triçikhībrāhmaṇopanishad, angeblich aus dem *Ātharvaṇarahasya*. Diese Hs. enthält nur einen Theil des Ganzen, nämlich bis शिखा प्राणमयी वृत्तियमाद्यष्टाङ्गसाधनैः ॥ Im Yoga erscheint Çiva als der höchste Gott, und die Übung desselben in allen Theilen führt zur höchsten Glückseligkeit (Kaivalya). 1. 1. 493, 49.

Beginnt: त्रिशिखी ब्राह्मण आदित्यलोकं जगाम तं गत्वोवाच । भगवन्किं देहः किं प्राणः किं कारणं किमात्मा । तं होवाच । सर्वमिदं शिव विजानीहि । किंतु नित्यः शुद्धो निरञ्जनो विभुरद्वयः शिव एकः स्वेन भासेदं सर्वं सृष्ट्वा तप्तायःपिण्डवदेकं भिन्नवद्वभासते । तद्भासकं किमिति चेदुच्यते । सच्छब्दवाच्यविद्याशबलं ब्रह्म । ब्रह्मणो ऽव्यक्तान्महन्महतो ऽहंकारो ऽहंकारात्पञ्चतन्मात्राणि पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि पञ्चमहाभूतेभ्यो ऽखिलं जगत् ॥ etc.*) Dazu

*) Dieser Auszug ist aus Skr. 122 b (Haug 237, s. folg. Seite) entnommen, weil Skr. 122 a (Haug 188) sehr fehlerhaft ist.

Skr. 122b (Haug 237).

Diese ausführliche Fortsetzung des ersten Theils giebt alle Einzelheiten des Yogasystems, wie wir sie aus den Yogasūtra und einzelnen Upanishads kennen. Beginnt p. 3ab: ज्ञानयोगः कर्मयोग इति योगो द्विधा मतः । क्रियायोगमथेदानीं शृणु ब्राह्मणसत्तम ॥ अव्याकुलस्य चित्तस्य बन्धनं विषये क्वचित् । यत्संयोगो द्विजश्रेष्ठ स च द्वैविध्यमश्नुते ॥ कर्म कर्तव्यमित्येव विहितेष्वेव कर्मसु । बन्धनं मनसो नित्यं कर्मयोगः स उच्यते ॥

Schliesst: सुषुप्तिवद्यश्चरति स्वभावपरिनिश्चलः । निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते ॥

Skr. 122a (Haug 208).

Darçanopanishad. In 10 Khaṇḍa. Darstellung des Yoga. l. l. 494, 108. Khaṇḍa 1 beginnt: दत्तात्रेयो महायोगी भगवान्भूतभावनः । चतुर्भुजो महाविष्णुर्योगसाम्राज्यदीक्षितः ॥ तस्य शिष्यो मुनिवरः सांकृतिर्नाम भक्तिमान् । पप्रच्छ गुरुमेकान्ते प्राञ्जलिर्विनयान्वितः ॥ भगवन्ब्रूहि मे योगं साष्टाङ्गं सप्रपञ्चकम् । येन विज्ञान (lies विज्ञात) मात्रेण जीवन्मुक्तो भवाम्यहम् ॥ सांकृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् । यमश्च नियमश्चैव तथैवासनमेव च ॥ प्राणायामस्तथा ब्रह्मन्प्रत्याहारस्ततः परम् । धारणा च तथा ध्यानं समाधिश्चाष्टमं मुने ॥*) अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् । क्षमा धृतिर्मिताहारः शौचं चैव यमा दश ॥ Diese 8 Tugenden werden erläutert.

Khaṇḍa 2 beginnt: तपः संतोषम् (lies संतोष) आस्तिक्यं दानमीश्वरपूजनम् । सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् । एते च नियमाः प्रोक्तास्तान्वक्ष्यामि क्रमाच्छृणु ॥

Khaṇḍa 3 beginnt: स्वस्तिकं गोमुखं पद्मं वीरसिंहासने तथा । भद्रं मुक्तासनं चैव मयूरासनमेव च । सुखासनसमाख्यं च नवमं मुनिपुंगव ॥

Khaṇḍa 4 beginnt: शरीरं तावदेव स्यात्षण्णवत्यङ्गुलात्मकम् । देहमध्ये शिवस्थानं तप्तजाम्बूनदप्रभम् ॥ त्रिकोणं मनुजानां तु सत्यमुक्तं हि सांकृते ॥ etc.

Khaṇḍa 5 (fol. 9a 2) beginnt: सम्यक्कथय मे ब्रह्मन्नाडिशुद्धिं समासतः । यया शुद्ध्या सदा ध्यायञ्जीवन्मुक्तो भवाम्यहम् ॥ सांकृते शृणु वक्ष्यामि नाडीशुद्धिं समासतः । विध्युक्तकर्मसंयुक्तः कामसंकल्पवर्जितः ॥

*) Diese acht Themata bilden den递 Haupttheil der Upanishad.

यमाद्यष्टाङ्गसंयुक्तः शान्तः सत्यपरायणः । स्वात्मव्यवस्थितः सम्यग्ज्ञानिभिश्च सुशिक्षितः ॥ पर्वताग्रे नदीतीरे बिल्वमूले वने ऽथवा । मनोरमे शुचौ देशे मठं कृत्वा समाहितः ॥

Khaṇḍa 7 beginnt: अथातः संप्रवक्ष्यामि प्रत्याहारं महामुने । इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ बलादाहरणं तेषां प्रत्याहारः स उच्यते । यत्पश्यति तु तत्सर्वं ब्रह्म पश्यन्समाहितः ॥ प्रत्याहारो भवेदेष ब्रह्मविद्भिः पुरोदितः । यद्यच्छुद्धमशुद्धं वा करोत्यामरणान्तिकम् ॥ तत्सर्वं ब्रह्मणे कुर्यात्प्रत्याहारः स उच्यते । अथवा नित्यकर्माणि ब्रह्माराधनबुद्धितः ॥ काम्यानि च तथा कुर्यात्प्रत्याहारः स उच्यते । अथवा वायुमाकृष्य स्थानात्स्थानं निरोधयेत् ॥

Khaṇḍa 8 beginnt: अथातः संप्रवक्ष्यामि धारणाः पञ्च सुव्रत । देहमध्ये गते व्योम्नि बाह्याकाशं तु धारयेत् ॥ प्राणे बाह्यानिलं तद्वज्ज्वलने चाग्निमौदरे । तोयं तोयांशके भूमिं भूमिभागे महामुने ॥ हयरावलकाराख्यं*) मन्त्रमुच्चारयेत्क्रमात् । धारणैषा परा प्रोक्ता सर्वपापविशोधिनी ॥

Khaṇḍa 10 beginnt: अथातः संप्रवक्ष्यामि समाधिं भवनाशनम् । समाधिः संविदुत्पत्तिः परजीवैकतां प्रति ॥ नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः । एकः सन्भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥ तस्मादद्वैतमेवास्ति न प्रपञ्चो न संसृतिः । यथाकाशो घटाकाशो महाकाश इतीरितः ॥ तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना । नाहं देहो न च प्राणो नेन्द्रियाणि मनो न हि ॥ सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः । इति धीर्या मुनिश्रेष्ठ सा समाधिरिहोच्यते ॥

Skr. 122a (Haug 200).

Devyupanishad. Die Allmacht der Durgā, die Pflichten ihrer Verehrer. Vgl. 1. l. 99. Beginnt: सर्वे वै देवा देवीमुपतस्थुः । कासि त्वं महादेवि । साब्रवीदहं स्वरूपिणी । मत्तः (manaḥ Hs.) प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च । अहमानन्दानानन्दाहम् । विज्ञानाविज्ञाने अहम् । ब्रह्माब्रह्मणी वेदितव्ये इत्याहाथर्वणी श्रुतिः ॥

Die Verse अहं रुद्रेभिर्वसुभिः und अहं राष्ट्री संगमनी sind aus dem Atharvaveda, देवीं वाचमजनयन्त und अदितिर्ह्यजनिष्ट aus dem Ṛigveda, तामग्निवर्णां तपसा aus dem Taittirīyāraṇyaka (Bibl. Ind. p. 788) entnommen. Ausserdem wird das Atharvaçīrsha erwähnt.

---

*) Der Hayarāvalakārākhyamantra scheint mir aus den Buchstaben ha ya ra va la gebildet zu sein.

Skr. 122a (Haug 197).

Nirvāṇashaṭka. 6 Verse, in denen ein den weltlichen Dingen entsagender Mann sich selbst als den geist- und freudenreichen Çiva darstellt. Beginnt: मनोबुद्ध्यहंकारचित्तानि नाहं न [च] श्रोत्रं न जिह्वा न च घ्राणनेत्रम् । न च व्योम भूमिर्न तेजो न वायुश्चिदानन्दरूपः शिवो ऽहं शिवो ऽहम् ॥ न पुण्यं न पापं न सौख्यं न निद्रा न मन्त्रो (mantram Hs.) न तीर्थं न वेदा न यज्ञः । अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्दरूपः शिवो ऽहं शिवो ऽहम् ॥

Gedruckt in Brihatstotraratnākara (Bombay 1895, p. 127) und Çaṃkarācārya zugeschrieben.

Skr. 122a (Haug 216).

Nṛisiṅhatāpanīyopanishad. Sieh o. S. 110.

Das Uttaratāpanīya beginnt fol. 13a 2: देवा ह वै प्रजापतिमब्रुवन् । अणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेति । तथेति । ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति । सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव ॥

Merkwürdig ist, dass Gauḍapāda und Çaṃkarācārya diese Upanishad erklärt haben, und dass auch Kumārila sie gekannt hat.

Skr. 122a (Haug 205).

Parabrahmopanishad. Die Macht der Seele, des höchsten Wesens, und die Erlangung der Erlösung. Derjenige, welcher Kenntniss von diesen erlangt, ist von Äusserlichkeiten, wie von dem Tragen der Haarlocken und der heiligen Schnur (yajñopavīta) entbunden. Er hat diese in ihrer geistigen Eigenschaft aufgefasst. Beginnt: अथ हैनं महाशालः शौनको ऽङ्गिरसं भगवन्तं पिप्पलादं विधिवदुपसन्नः पप्रच्छ । दिव्ये ब्रह्मपुरे प्रतिष्ठिता भवन्ति कथं सृजन्तीत्यात्मन एष महिमा । विभज्य एष महिमा विभुः क एषः । तस्मै स होवाच । एतत्सत्यं (एष सत्यं Hs.) तत्प्रब्रवीमि ब्रह्मविद्यां वरिष्ठां देवेभ्यः प्राणेभ्यः । परब्रह्मपुरे (रं Hs.) विरजं निष्कलं शुभ्रमक्षरं विरजं विभाति ॥

Schliesst: तस्मात्सर्वप्रयत्नेन मोक्षापेक्षी भवेद्यतिः । बहिःसूत्रं परित्यज्य स्वान्तःसूत्रं तु धारयेत् ॥ बहिःप्रपञ्चशिखोपवीतित्वमनादृत्य प्रणवहंसशिखोपवीतित्वमवलम्ब्य मोक्षसाधनं कुर्यादित्याह भगवाञ्छौनकः ॥

Diese Upanishad stimmt wesentlich mit der Brahmopanishad überein. Vgl. Catal. IO. 1. 1. 96.

Skr. 122a (Haug 190).

Pāçupatabrahmopanishad. Die Macht des Gottes Brahman, und dann von Çiva. Durch Erkenntniss der Gottheit wird der Yogin

von allen Banden befreit. Beginnt: अथ ह वै स्वयंभूर्ब्रह्मा प्रजाः सृजानीति कामकामो जायते । कामेश्वरो वैश्रवणो ब्रह्मपुत्रो बालखिल्यः स्वयंभुवं (°भुं Hs.) परिपृच्छति । जगतां का विद्या का देवता । जाग्रत्तुरीययोरस्य (°तुरीयस्यो Hs.) को देवो यानि तस्य वशानि । कालाः कियत्प्रमाणाः । कस्याज्ञया रविचन्द्रग्रहादयो भासन्ते । कस्य महिमा गगनस्वरूपः । एतदहं श्रोतुमिच्छामि नान्यो जानाति त्वं ब्रूहि ब्रह्मन् । स्वयंभूरुवाच (°भु Hs.) । कृत्स्नजगतां मातृका विद्या द्विचिवर्णसहिता द्विवर्णमाता त्रिवर्णसहिता । चतुर्मात्रात्मकोङ्कारो मम प्राणात्मिका देवता । अहमेव जगत्त्रयस्यैकः ॥

Schliesst: ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् । पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ॥ 1 l. 95.

Skr. 122a (Haug 187).

Pindopanishad. Sieh o. S. 111.

Skr. 122a (Haug 211).

Paippalādopanishad oder *Çarabhopanishad.* Sieh Çarabhopanishad Skr. 122c (Haug 269).

Skr. 122a (Haug 196).

Bahvricopanishad. Lob der Tripurasundarī. Beginnt: देवी ह्येकाग्र आसीत् । सैव जगदण्डमसृजत् । कामकलेति विज्ञायते । शृङ्गारकलेति विज्ञायते । तस्या एव ब्रह्मा अजीजनत् । विष्णुरजीजनत् । रुद्रो ऽजीजनत् । सर्वे मरुद्गणा अजीजनन् ॥ 1. l. 126.

Skr. 122a (Haug 202).

*Bhāvanopanishad**). Zuerst werden die verschiedenen Çakti behandelt, dann mehrere Gottheiten, wie Kāmeçvarī, Vajreçvarī, und andere Einzelheiten. Gelegentlich wird Çrīcakrapūjana erwähnt. Die Namen Kurukullā und Vajreçvarī erweisen, dass die Schrift buddhistischen Ursprungs ist. Jedoch sind çivaïtische Vorstellungen beigemischt. Beginnt: श्रीगुरुः परमकारणभूता शक्तिः । केन नवरन्ध्ररूपो देहः । नवशक्तिमयं श्रीचक्रम् । वाराही पितृरूपा । कुरुकुल्लावली देवता माता । पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः । आधारनवचक्रमुद्राः शक्तयः । त्वगादिसप्तधातुभिरनेकैः संयुक्ताः संकल्पाः कल्पत-

---

*) भावन nf. mental perception, recollection, the present consciousness of past ideas or perceptions. Dictionary by H. H. Wilson, second Edition.

रवः । तेजः कल्पकोद्यानम् । रसनया भाव्यमानमधुराम्लतिक्तकटुकषायलवणरसाः षड्रृतवः । क्रियाशक्तिः पीठम् ॥ कुण्डलिनी ज्ञानशक्तिर्गृहम् । इच्छाशक्तिर्महात्रिपुरसुन्दरी ॥

Schliesst: एवं मुहूर्तत्रयं भावनया युक्तो जीवन्मुक्तो भवति । तस्य देवतात्मैक्यसिद्धिः । चिन्तितकार्याण्ययत्नेन सिध्यन्ति । स एव शिवयोगीति कथ्यते ॥ l. l. 102.

Skr. 122a (Haug 199).

Bhikshukopanishad. Vier Arten von brahmanischen Bettlern, nämlich Kuṭīcaka, Bahūdaka, Hañsa, Paramahañsa suchen Erlösung von der Seelenwanderung. Beginnt: अथ भिक्षूणां मोक्षाधिकारिणां (mokshārthinām B.) कुटीचकबहूदकहंसपरमहंसाश्चेति चत्वारः । कुटीचका गौतमभरद्वाजयाज्ञवल्क्यवसिष्ठप्रभृतयः । अष्टौ ग्रासांश्चरन्तो योगमार्गेण मोक्षमेव प्रार्थयन्ते । अथ बहूदकास्त्रिदण्डकमण्डलुशिखायज्ञोपवीतकाषायवस्त्रधारिणो ब्रह्मर्षिगृहे (so B.) मधुमांसं वर्जयित्वा गोमूत्रगोमयहारिणो नित्यचान्द्रायणपरा मोक्षमेव प्रार्थयन्ते ॥ etc. Dazu

187 (Skr. 122c, Haug 276).

Bhikshukopanishad (B). l. l. 78.

Skr. 122a (Haug 213).

Mahāvākyopanishad. Beginnt: अथ होवाच ब्रह्मा । अपरोक्षानुभवपरोपनिषदं (die Upanishad, welche sichtbare Wahrnehmung zum Gegenstand hat) व्याख्यास्यामः । गुह्याद्गुह्यतरमेषा । न प्राकृतायोपदेष्टव्या सात्त्विकायन्तर्मुखाय परिशुश्रूषवे ॥ l. l. 110.

Skr. 122a (Haug 215).

Muktikopanishad. Die verschiedenen Arten die Erlösung zu erlangen. Erstens wird die Lesung von 108 Upanishads, welche aufgezählt sind, empfohlen. Zweitens werden die Upanishads der vier Veden genannt. Beginnt: अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे । सीताभरतसौमित्रिशत्रुघ्नाद्यैः समन्वितम् ॥ सनकाद्यैर्मुनिगणैर्वसिष्ठाद्यैः शुकादिभिः । अन्यैर्भागवतैश्चापि स्तूयमानमहर्निशम् ॥ धीविक्रियासहस्राणां साक्षिणं निर्विकारिणम् । स्वरूपध्याननिरतं समाधिविरमे हरिम् ॥ भक्त्या शुश्रूषया रामं स्तुवन्पप्रच्छ मारुतिः । राम त्वं परमात्मासि सच्चिदानन्दविग्रहः ॥ इदानीं त्वां रघुश्रेष्ठ प्रणमामि मुहुर्मुहुः । त्वद्रूपं ज्ञातुमिच्छामि तत्त्वतो राम मुक्तये ॥ l. l. 127.

Skr. 122 a (Haug 182)

Yogakuṇḍalyupanishad. In 3 Adhyāyāḥ. Diese behandeln hauptsächlich das Regeln des Athmens (Prāṇāyāma). Wer diese beobachtet, wird zuletzt der Gott Brahman.

Adhyāya 1 beginnt: हेतुद्वयं हि चित्तस्य वासना च समीरणः । तयोर्विनष्ट एकस्मिंस्तद्वावपि विनश्यतः ॥ तयोरादौ समीरस्य जयं कुर्यान्नरः सदा । मिताहारश्चासनं च शक्तिचालस्तृतीयकः ॥ एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरम् । सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ॥ भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते । आसनं द्विविधं प्रोक्तं पद्मं वज्रासनं तथा । ऊर्वोरुपरि चेद्धत्ते उभे पादतले यथा । पद्मासनं भवेदेतत्सर्वपापप्रणाशनम् ॥ वामाङ्घ्रिमूलं कन्दाध अन्यत्तदुपरि क्षिपेत् । समग्रीवाशिरःकायो वज्रासनमितीरितम् ॥ कुण्डल्येव भवेच्छक्तिस्तां तु संचालयेद्बुधः । स्वस्थानादा भ्रुवोर्मध्यं शक्तिचालनमुच्यते ॥ तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनं । प्राणरोधनम[था]भ्यासादृज्वी कुण्डलिनी (in der Gestalt einer Schlange) भवेत् ।

Adhyāya 2 beginnt fol. 5 b 4: अथाहं संप्रवक्ष्यामि विद्यां खेचरिसंज्ञिकाम् । यथा विज्ञातवानस्या लोकेऽस्मिन्नजरोऽमरः ॥ मृत्युव्याधिजराग्रस्तो दृष्ट्वा विद्यामिमां मुने । बुद्धिं दृढतरां कृत्वा खेचरीं तु समभ्यसेत् ।

Adhyāya 3 beginnt fol. 8 a 8: मेलनमनुः । ह्रीं भं सं पं फं सं ॥ पद्मज उवाच ॥ अमावास्या च प्रतिपत्पौर्णमासी च शंकर । अस्याः का वर्ण्यते संज्ञा एतदाख्याहि तत्त्वतः ॥ प्रतिपद्दिनतोऽकाले अमावास्या तथैव च । पौर्णमास्यां स्थिरीकुर्यात्स च पन्था हि नान्यथा ॥ कामेन विषयाकाङ्क्षी विषयात्काममोहितः । द्वावेव संत्यजेन्नित्यं निरञ्जनमुपाश्रयेत् ॥ अपरं संत्यजेत्सर्वं यदिच्छेदात्मनो हितम् । शक्तिमध्ये मनः कृत्वा मनः शक्तेश्च मध्यगम् ॥ मनसा मन आलोक्य तत्त्यजेत्परमं पदम् । मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारकम् ॥ Hier bricht die Hs. ab. l. l. 104.

Skr 122a (Haug 192).

Rudrahṛidayopanishad. In den ersten 24 Çlokāḥ wird Rudra mit Umā verehrt, in den übrigen Rudra allein. Beginnt: हृदयं कुण्डली भस्मरुद्राक्षगणदर्शनम् । तारसारं महावाक्यं पञ्च ब्रह्माग्निहोत्रकम् ॥ प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह । को देवः सर्वदेवेषु कस्मिन्देवाश्च सर्वशः । कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्तु मे ॥ तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम् ॥ श्रीवेदव्यास उवाच ॥

सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः । रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयो ऽग्नयः ॥ वामपार्श्वे उमा देवी विष्णुः सोमो ऽपि ते त्रयः । या उमा सा स्वयं विष्णुर्यो विष्णुः स हि चन्द्रमाः ॥ ये नमस्यन्ति गोविन्दं ते नमस्यन्ति शंकरम् । ये ऽर्चयन्ति हरिं भक्त्या ते ऽर्चयन्ति वृषध्वजम् ॥ ये द्विषन्ति विरूपाक्षं ते द्विषन्ति जनार्दनम् । ये रुद्रं नाभिजानन्ति ते न जानन्ति केशवम् ॥

Schliesst: स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः । ब्रह्मैव भवति स्वस्थः सच्चिदानन्दमात्रकः ॥ I. l. 103.

Skr. 122a (Haug 194).

Vajrasūcyupanishad, gewöhnlich Çaṃkarācārya zugetheilt. In dieser Hs. ohne allen Grund dem Sāmaveda zugeschrieben. Nach einer Erörterung, wer kein rechter Brāhmaṇa ist, wird entschieden, dass nur ein frommer Mann ein Brāhmaṇa ist. Beginnt: वज्रसूचिं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् । दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥ ब्रह्मक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णास्तेषां वर्णानां ब्राह्मण एव प्रधान इति वेदवचनानुरूपं स्मृतिभिरप्युक्तम् ॥ I. l. 493, 41.

Skr. 122a (Haug 185).

Vedāntasāraviçrāmopanishad. Wenn der Geist im Osten, Südosten, Süden, Südwesten, Westen, Nordwesten, Norden, Nordosten ausruht (sich hinneigt), so sind die Folgen je nach der Himmelsgegend entweder günstig oder das Gegentheil. Um die gewöhnliche indische Zahl der Himmelsrichtungen zu vervollständigen, werden zwei hinzugefügt mit den Namen saṃdhisaṃdhimiçra und madhya. Beginnt: तस्याष्टदले वृत्तिर्भवति पूर्वदले श्वेतवर्णे यदा विश्रामते मनः । तदा धैर्यमुदारं च धर्मकीर्तिर्मतिर्भवेत् ॥ अग्निदले रक्तवर्णे यदा विश्रामते मनः । तदा निद्रालस्यं च मन्दबुद्धिर्भवेत् ॥

Skr. 122a (Haug 203).

Çārīrakopanishad. Die Theile des Körpers und ihre Bedeutung im Vedānta. Beginnt: अथातः पृथिव्यादिमहाभूतानां समवायः शरीरम् । यत्कठिनं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेजो यत्संचरति स वायुर्यत्सुषिरं तदाकाशम् । श्रोत्रादीनि ज्ञानेन्द्रियाणि । श्रोत्रमाकाशे वायौ त्वगग्नौ चक्षुरप्सु जिह्वा पृथिव्यां घ्राणमिति ॥ एषामिन्द्रियाणां यथाक्रमेण शब्दस्पर्शरूपरसगन्धाश्चेति विषयाः पृथिव्यादिमहाभूतेषु क्रमेणोत्पन्नाः ॥ I. l. 494, 80. Dazu

Skr. 122 c (Haug 272).

Çārīrakopanishad, weniger correct.

Skr. 122 a (Haug 184).

Çukarahasyopanishad. Vyāsa bringt seinen Sohn Çaka zu Çiva mit der Bitte ihn über das Brahma zu unterrichten. Der wesentliche Inhalt ist die Belehrung über das *Mahavākya.* Daran schliessen sich mystische Formeln. Beginnt: **अथातो रहस्योपनिषदं व्याख्यास्यामः । देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छुः । भगवन्नस्माकं रहस्योपनिषदं ब्रूहीति । सो ऽब्रवीत् । पुरा व्यासो महातेजाः सर्ववेदतपोनिधिः । प्रणिपत्य शिवं साम्बं कृताञ्जलिरुवाच ह ॥ श्रीवेदव्यासः । कर्मणि । महाप्राज्ञ पाशच्छेददृढव्रत । शुकस्य मम पुत्रस्य वेदसंस्कारदेवदेव ब्रह्मोपदेशकालो ऽयमिदानीं समुपस्थितः ॥**

Skr. 122a (Haug 191).

Savitryupanishad. Über die bekannte Strophe tat savitur vareṇyam. Beginnt: **कः सविता का सावित्री** (dieselbe Frage neunmal wiederholt und beantwortet) । **अग्निरेव सविता पृथिवी सावित्री । स यत्राग्निस्तत्पृथिवी य[त्र वै पृथिवी तत्राग्निस] ते द्वे योनिस्तदेकं मिथुनम् ॥ कः सविता का सावित्री । वरुण एव सवितापः सावित्री । स यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम् ॥**

Skr. 122 a (Haug 179).

Sūryopanishad. Lob von Sūrya, der mit Nārāyaṇa identificirt wird, und die Belohnung derer, welche diese Upanishad lesen. Beginnt: **अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः । ब्रह्मा ऋषिः । गायत्री छन्दः । आदित्यो देवता । हंसः सो ऽहमग्निनारायणयुक्तं बीजम् । हृल्लेखा शक्तिः । वियदादिसर्वसंयुक्तं कीलकम् । चतुर्विधपुरुषार्थे विनियोगः । षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुजसंस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं श्रीसूर्यनारायणं यो वेद स वै ब्राह्मणः ॥**

186.

Skr. 122 b (Haug 219—256).

189 Blätter. 9—11 Zeilen. Schrift und Format wie in 185.

38 Upanishads. 2. Band zu 185. Vgl. Haug l. l. 30. Beschreibung und Verweisungen wie in 185.

Skr. 122 b (Haug 228).

Atharvaçira-Upanishad in 6 Khaṇḍa. Verherrlichung von Rudra, Lob der Götter an ihn, und Belohnung der Leser dieser Upanishad.

Beginnt: देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन् । को भवानिति । सो ऽब्रवीदहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चन मत्तो व्यतिरिक्त इति ॥ Bessere Hs. als Haug 35, 6 (o. S. 104).

Gedruckt in Upanishadām Samuccayaḥ mit Nārāyaṇa's Commentar, p. 7. Übersetzt von Deussen l. l. p. 716.

Skr. 122 b (Haug 236).

Adhyātmopanishad. Diese besteht aus zwei Theilen. Im ersten wird Nārāyaṇa als alles Weltliche und Geistige beherrschend dargestellt. Zweitens durch vollkommene Isolirung von äusseren Dingen gelangt der Yogin zur Einigung mit der Gottheit und ist bei Lebzeiten erlöst. Beginnt: अन्तः शरीरे निहितो गुहायामज एको नित्यमस्य पृथिवी शरीरं यः पृथिवीमन्तरे संचरन्यं पृथिवी न वेद । यस्यापः शरीरं यो ऽपो ऽन्तरे संचरन्यमापो न विदुः । यस्य तेजः शरीरं यस्तेजो ऽन्तरे संचरन्यं तेजो न वेद । यस्य वायुः शरीरं यो वायुमन्तरे संचरन्यं वायुर्न वेद । यस्याकाशः शरीरं य आकाशमन्तरे संचरन्यमाकाशो न वेद । यस्य मनः शरीरं यो मनो ऽन्तरे संचरन्यं मनो न वेद । यस्य बुद्धिः शरीरं यो बुद्धिमन्तरे संचरन्यं बुद्धिर्न वेद । यस्याहंकारः शरीरं यो ऽहंकारमन्तरे संचरन्यमहंकारो न वेद । यस्य चित्तं शरीरं यश्चित्तमन्तरे संचरन्यं चित्तं न वेद । यस्याव्यक्तं शरीरं यो ऽव्यक्तमन्तरे संचरन्यमव्यक्तं न वेद । यस्याक्षरं शरीरं यो ऽक्षरमन्तरे संचरन्यमक्षरं न वेद । यस्य मृत्युः शरीरं यो मृत्युमन्तरे संचरन्यं मृत्युर्न वेद । स एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः ॥ १ ॥

2 beginnt: अहं ममेति यो भावो देहाक्षादावनात्मनि । अध्यासो ऽयं निरस्तव्यो विदुषा ब्रह्मनिष्ठया ॥ ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् । सो ऽहमित्येव तद्वृत्त्या स्वान्यत्रात्ममतिं त्यजेत् ॥ लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् । शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥*)

Schliesst: शुद्धबोधस्वरूपो ऽहं केवलो ऽहं सदाशिवः । एतां विद्यामपान्तरतमाय ददौ । अपान्तरतमो ब्रह्मणे ददौ । ब्रह्मा घोराङ्गिरसे ददौ । घोराङ्गिरा रैक्वाय ददौ । रैक्वो रामाय ददौ । रामः सर्वेभ्यो भूतेभ्यो ददावित्येतन्निर्वाणानुशासनं वेदानुशासनं वेदानुशासनमित्युपनिषत् ॥ Vgl. Catal. IO. 494, 91.

*) Der folgende Vers dient zur Erläuterung von 2. वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् । स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥

Skr. 122 b (Haug 226).

Amṛtanādopanishad. Sieh o. S. 104.

Skr. 122 b (Haug 233).

Ātmabodhopanishad. Beginnt: **प्रत्यगानन्दं ब्रह्मरूपं प्रणवं अकार उकारो मकार इति ॥** Diese aus einem Blatt bestehende Upanishad ist der fünfte Khaṇḍa der Nārāyaṇopanishad. Eine mehr correkte Lesung findet sich in Jacob's Ausgabe von 11 Upanishads p. 51. Çaṃkarānanda erkennt diesen Khaṇḍa nicht an.

Skr. 122 b (Haug 235).

Ātmopanishad, mit einem längeren Zusatz. Sieh o. S. 104.

Skr. 122 b (Haug 222).

Āruṇeyopanishad. Sieh o. S. 105.

Skr. 122 b (Haug 256).

Oṃkāradhvaninādopanishad. Diese Handschrift enthält eine bedeutend erweiterte Recension der Dhyānabindūpanishad. Sieh o. S. 109.

Skr. 122 b (Haug 253).

Kalisaṃtaraṇopanishad. Wer die folgenden 16 Namen von Kṛishṇa hersagt, wird von den Sünden der Kali-Periode befreit. Beginnt: **द्वापरान्ते नारदो ब्रह्माणं प्रतिजगाम । कथं नु भगवो गां पर्यटन्कलिं संतरेयमिति । स होवाच । साधु पृष्टो ऽस्मि । सर्वश्रुतिरहस्यं गोप्यं तच्छृणु येन कलिगतसंसारं तरिष्यसे । भगवत आदिविष्णोर्नारायणस्य [नामोच्चारणमात्रेण निर्धूतकलिर्भवति] पुनर्नारदः पप्रच्छ । भगवन्किं नामेति । स होवाच । हरे राम हरे राम राम राम हरे हरे हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे । इति षोडशकं नाम्नां कलिकल्मषनाशनम् ॥** Vgl. Catal. IO. 494, 122.

Skr. 122 b (Haug 240).

Kālāgnirudropanishad. Sieh o. S. 106.

Skr. 122 b (Haug 254).

Kṛishṇopanishad. Kṛishṇa-Vishṇu sind identisch mit Rāma. Alle Götter und Personen, welche in der Kṛishṇasage vorkommen, sogar die Geräthe und Schmucksachen, die er trägt, wie der Hirtenstab, Rad und Muschel, werden symbolisch erklärt. Beginnt: **श्रीमहाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो वनवासिनो विस्मिता बभूवुः । तं होचुः । नो ऽवद्यमवतारा** (rān Hs.) **वै**

गच्छन्ते आलिङ्गामो भवन्तमिति । भवान्तरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिङ्गथ । अन्ये ये ऽवतारास्ते हि गोपालस्त्रीश्च नो कुरु । अन्योन्यविग्रहं धार्यं तवाङ्गस्पर्शनादिह । शश्वत्स्पर्शयतास्माकं गृह्णीमो ऽवतारान्वयम् ॥ रुद्रादीनां वचः श्रुत्वा प्रोवाच भगवान्स्वयम् । अङ्गसङ्गं करिष्यामि भवद्वाक्यं करोम्यहम् ॥ मोदितास्ते सुराः सर्वे कृतकृत्याधुना वयम् । यो नन्दः परमानन्दो यशोदा मौक्तिकेहनि (?) **॥**
Vgl. Catal. IO. 494, 115.

Skr. 122b (Haug 243).

Kaushītakyupanishad, schon in 67 (o. S. 30) aufgeführt. Nur die zwei ersten adhy. Der 2. adhy. beginnt fol. 4a 8 und schliesst fol. 10b 5: **तथा समापयितव्यो भवति । तथा समापयितव्यो भवति । इत्यारण्यके द्वितीयो ऽध्यायः ॥** Neuerdings gedruckt in U. S., p. 113.

Skr. 122b (Haug 242).

Kshurikopanishad. Sieh o. S. 107.

Skr. 122b (Haug 251).

Gārudopanishad. Anrufung von Garuḍa gegen Schlangenbiss. (A.) Beginnt: **ब्रह्मविद्यां प्रवक्ष्यामि यां ब्रह्मा नारदाय नारदो बृहत्सेनाय बृहत्सेन इन्द्राय इन्द्रो भरद्वाजाय भरद्वाजो जीवत्कामेभ्यः शिष्येभ्यः प्रायच्छत् ॥**

Gedruckt in Jacob's Eleven Upanishads p. 83. Übersetzt von Deussen l. l., p. 627. Sieh o. S. 107.

Skr. 122b (Haug 224).

Jābālyupanishad. Die Mittel zur Erlösung sind, Çiva als Weltseele zu erkennen. Çiva ist Paçupati. Das Legen von Asche bis zur Stirn, den Augen, den Brauen. Diese drei Linien (rekhā) werden als die drei Veden gedeutet und führen zur Befreiung von der Seelenwanderung. Beginnt: **अथ हैनं भगवन्तं जाबालिं पैप्पलादिः पप्रच्छ । भगवन्मे ब्रूहि परमतत्त्वरहस्यम् । किं तत्त्वं को जीवः ॥ कः पशुः क ईशः को मोक्षोपाय इति ॥**

Dieselbe Upanishad findet sich in Catal. IO. No. 494, 123.

Skr. 122b (Haug 246).

Turīyātītāvadhūtopanishad. Wer nach Entsagung von allen menschlichen Dingen stirbt, der hat sein rechtes Ziel erreicht. Beginnt: **अथ तुरीयातीतावधूतानां को ऽयं मार्गस्तेषां का स्थितिरिति**

पितामहो भगवन्तं पितरमादिनारायणं परिसमेत्योवाच । तमाह भगवान्नारायणो यो ऽयमवधूतमार्गस्थो लोके दुर्लभतरो न तु बाहुल्यो यद्येको भवति स एव नित्यपूतः स एव वैराग्यमूर्तिः स एव ज्ञानाकारः स एव वेदपुरुष इति ज्ञानिनो मन्यन्ते ॥ Dieser Anfang mutatis mutandis findet sich auch in der Paramahaṁsopanishad.

Skr. 122 b (Haug 237).

Triçikhībrāhmaṇopanishad. Sieh o. S. 121.

Skr. 122 b (Haug 252).

Dattātreyopanishad. In 3 Khaṇḍa. Verherrlichung von Dattātreya, und Belohnung dessen, der diese Upanishad liest. Beginnt: सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं तन्नो ब्रूहीति (भगवन्) । इत्युक्तः सत्यानन्दचिदात्मकं सात्त्विकं मामकं धामोपास्वेत्याह । सदा दत्तो ऽहमस्मीति प्रत्येतत्संवदन्ति ये न ते संसारिणो भवन्ति । नारायणेनैवं विवक्षितो ब्रह्मा विश्वरूपधरं विष्णुं नारायणं दत्तात्रेयं ध्यात्वा सद्वदति दमिति ह्रस्वम् । दामिति दीर्घं तद्बीजं नाम बीजस्थम् । दामित्येकाक्षरं भवति तदेतत्तारकं भवति । तदेवोपासितव्यं विज्ञेयं गर्भादितारणम् ॥ Vgl. Catal. IO. 494, 120.

Skr. 122 b (Haug 227).

Nādabindūpanishad. Sieh o. S. 109.

Skr. 122 b (Haug 239).

Nirālambopanishad. Vierzig vedāntische Fragen und Antworten. Hauptsächlich beziehen sich diese auf das höchste Wesen, das neutrale Brahman. Beginnt: एषामज्ञानजन्तूनां समस्तारिष्टशान्तये । यद्यद्बोद्धव्यमखिलं तदाशङ्क्य ब्रवीम्यहम् ॥*) 1) किं ब्रह्म । 2) [क ईश्वरः] । 3) को जीवः । 4) का प्रकृतिः । 5) कः परात्मा । 6) को ब्रह्मा । 7) को विष्णुः । 8) को रुद्रः । 9) क इन्द्रः । 10) कः शमनः । 11) कः सूर्यः । 12) कश्चन्द्रः । 13) के सुराः । 14) के असुराः । 15) के पिशाचाः । 16) के मनुष्याः । 17) काः स्त्रियः । 18) के पश्वादयः । 19) किं स्थावरम् । 20) के ब्राह्मणादयः । 21) का जातिः । 22) किं कर्म । 23) किमकर्म । 24) किं ज्ञानम् । 25) किमज्ञानम् । 26) किं सुखम् । 27) किं दुःखम् । 28) कः स्वर्गः । 29) को नरकः । 30) को बन्धः । 31) को मोक्षः ।

*) Die Zahlen sind der Deutlichkeit wegen von mir beigefügt.

32) क उपास्यः । 33) कः शिष्यः । 34) को विद्वान् । 35) को मूढः । 36) किमासुरम् । 37) किं तपः । 38) किं परमं पदम् । 39) किं ग्राह्यम् । 40) किमग्राह्यम् ॥

कः संन्यासीत्याशङ्क्याह । ब्रह्मेति स होवाच । महदहंकारपृथिव्यप्तेजोवाय्वकाशव्यापकत्वेन बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया भासमानमद्वितीयमखिलोपाधिविनिर्मुक्तं तत्सकलशक्त्युपबृंहितमनाद्यमनन्तं शुद्धं शिवं शान्तं निर्गुणमित्यादिवाच्यमनिर्वाच्यं चैतन्यं ब्रह्म ॥

Weber in seiner Ausgabe (Indische Studien XVII, p. 136) hat nur 29 Fragen und Antworten, Lālmitra Notices No. 675 giebt 30 an. Vgl. Catal. IO. 493, 39.

Skr. 122b (Haug 229).

Atharvaśikhopanishad. Sieh o. S. 104.

Skr. 122b (Haug 225).

Paramahaṅsaparivrājakopanishad, der der Welt entsagende wandernde Paramahaṅsa. Beginnt: अथ पितामहः स्वपितरमादिनारायणमुपसमेत्य प्रणम्य पप्रच्छ । भगवन् त्वन्मुखाद्वर्णाश्रमधर्मक्रमं सर्वं श्रुतं विदितमवगतम् । इदानीं परमहंसपरिव्राजकलक्षणं वेदितुमिच्छामि । कः परिव्रजनाधिकारी कीदृशं परिव्राजकलक्षणं कः परमहंसः परिव्राजकत्वं कथम् । तत्सर्वं मे ब्रूहीति ॥ Vgl. Catal. IO. 494, 84.

Skr. 122b (Haug 219).

Brahmavidyopanishad. 1) über den Oṃkāra. 2) über die Haṅsavidyā, die Kenntniss der Seele. 3) die Eigenschaften derselben. Beginnt: अथ ब्रह्मविद्योपनिषदुच्यते ॥ प्रसादाद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः । रहस्यं ब्रह्मविद्याया ध्रुवाग्निं संप्रचक्षते । (sampratīkshate A.) ॥ ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः । शरीरं तस्य वक्ष्यामि स्थानं कालं लयं (kālatrayam A.) तथा ॥ तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयो ऽग्नयः । तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य तु ॥

Schliesst fol. 6b: सर्वग्रासो ऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहम् । एवं यो वेद तत्त्वेन स वै पुरुष उच्यते ॥ Vgl. Catal. IO. 493, 45.

Gedruckt in U. S. mit dem Commentar von Narāyaṇa, p. 341. Übersetzt von Deussen l. l. p. 629.

Skr. 122b (Haug 255).

Die ersten 13 Çlokāḥ derselben Upanishad.

Skr. 122 b (Haug 223).

Bhargopanishad. Die Bildung des menschlichen Körpers. Beigefügt sind einige Ideen aus dem Vedānta. Eine Stelle findet sich in der Çārīropanishad. Beginnt: पञ्चात्मकं पञ्चसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तम् । तत्सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम् ॥

Keine Sammlung enthält diese Upanishad, noch wird sie in einer anderen erwähnt.

Skr. 122 b (Haug 220).

Maṇḍalabrāhmaṇopanishad. In 5 Brāhmaṇa. Die Grundzüge des Yoga. Zugleich wird gelehrt, wie der entsagende Paramahaṅsa bei Lebenszeit erlöst wird und mit dem höchsten Geiste (Paramātman oder Brahman) sich vereinigt. Beginnt: याज्ञवल्क्यो ह वै महामुनिरादित्यलोकं जगाम । तमादित्यं नत्वा भो भगवन्नादित्यात्मतत्त्वमनुब्रूहीति । स होवाच नारायणः । ज्ञानयुक्तयमाद्यष्टाङ्गयोग उच्यते । शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनिग्रहश्चैते यमाः । गुरुभक्तिः सत्यमार्गानुरक्तिः सुखागतवस्त्वनुभवश्च तद्वस्त्वनुभवेन तुष्टिर्निःसङ्गता एकान्तवासमनोनिवृत्तिः फलानभिलाषो वैराग्यभावश्च नियमाः ॥ etc.

Brāhmaṇa 2 fol. 3 a 3 beginnt: अथ याज्ञवल्क्य आदित्यमण्डलपुरुषं पप्रच्छ । भगवन्नन्तर्लक्ष्यादिकं बहुधोक्तम् । मया तन्न ज्ञातम् । तद्ब्रूहि मह्यम् । तदु होवाच । पञ्चभूतकारणं तडित्कूटाभं तद्वच्चतुःपीठम् । तन्मध्ये तत्त्वप्रकाशो भवति । सो ऽतिगूढ अव्यक्तश्च । तज्ज्ञानप्लवाधिरूढेन ज्ञेयम् । तद्बाह्याभ्यन्तर्लक्ष्यम् । तन्नादबिन्दुकलातीतम् ॥

Brāhmaṇa 3 fol. 5 a 2 beginnt: याज्ञवल्क्यो महामुनिर्मण्डलपुरुषं पप्रच्छ । स्वामिन्नमनस्कलक्षणमुक्तमपि विस्मृतम् । पुनस्तल्लक्षणं ब्रूहीति । तथेति मण्डलपुरुषो ऽब्रवीत् । इदममनस्कमतिरहस्यं यज्ज्ञानात्कृतार्थो भवति । तन्नित्यं शाम्भवीमुद्रान्वितम् । परमात्मदृष्ट्या तत्प्रत्ययलक्ष्याणि दृष्ट्वा तदनु सर्वेशमप्रमेयमजं शिवं परमाकाशं निरालम्बमद्वयं ब्रह्मविष्णुरुद्रादीनामेकलक्ष्यं सर्वकारणं परब्रह्मात्मत्वेन पश्यमानो गुहाविहरणमेव ज्ञात्वा etc.

Brāhmaṇa 4 fol. 5 b 5 beginnt: अथ याज्ञवल्क्यो मण्डलपुरुषं पप्रच्छ । व्योमपञ्चकलक्षणं विस्तरेणानुब्रूहीति । स होवाच । आकाशं पराकाशं महाकाशं सूर्याकाशं परमाकाशमिति पञ्च भवन्ति । बाह्याभ्यन्तरमन्धकारमयमाकाशम् । बाह्याभ्यन्तरे कालानलसदृशं पराकाशम् । सबाह्याभ्यन्तरे ऽपरिमितद्युतिनिभं तत्त्वं महाकाशम् । सबाह्याभ्यन्तरे

सूर्यनिभं सुर्याकाशम् । अनिर्वचनीयज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशम् ॥ etc.

Brāhmaṇa 5 fol. 5 b 11 beginnt: सविषयं मनो बन्धाय निर्विषयं मुक्तये भवति । अथ सर्वजगच्चित्तगोचरम् । तदेव चित्तं निराश्रयं मनोऽन्यवस्थापरिपक्वं लययोग्यं भवति । तल्लयं परिपूर्णे मयि समभ्यसेत् । मनोलयकारणमहमेव ॥

Schliesst: एवं चिरसमाधिजनितब्रह्मामृतपानपरायणो ऽसौ संन्यासी परमहंसो ऽवधूतो भवति । तद्दर्शनेन सकलं जगत्पवित्रं भवति । तत्सेवापरो ऽप्यज्ञो ऽपि मुक्तो भवति । तत्कुलमेकोत्तरशतं तारयति । तन्मातृपितृजायापत्यवर्गं मुक्तं भवतीत्युपनिषत् ॥ Vgl. Catal. IO. 493, 53.

Skr. 122b (Haug 230).

Maitreyyupanishad (*Maitreyopanishad*), schon in 120 (o. S. 57) beschrieben. Schluss fol. 23 b 3: इत्यादि रुद्रोपनिषत् । इति मैत्रेय्युपनिषत्समाप्तेति ॥

Skr. 122b (Haug 247).

Yājñavalkyopanishad. Entsagung von irdischen Genüssen, namentlich von Frauen, von Seiten des Yati. Beginnt: अथ जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच । भगवन्संन्यासमनुब्रूहीति कथं संन्यासलक्षणम् । स होवाच याज्ञवल्क्यः । ब्रह्मचर्यं समाप्य गृही भवेत् । गृहाद्वनी भूत्वा प्रव्रजेत् । यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा । अथ पुनर्व्रती वाव्रती वा स्नातको वास्नातको वा उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् ॥ Vgl. Catal. IO. 494, 116.

Skr. 122b (Haug 232).

Yogatattvopanishad. Sieh o. S. 114.

Skr. 122b (Haug 234).

Yogatattvopanishad, zu Anfang als Yogatattvabodhopanishad bezeichnet, die grössere Recension, vgl. Deussen l. l. 669; o. S. 114.

Skr. 122b (Haug 244).

Rāmatāpanīyopanishad. Sieh o. S. 114.

Skr. 122b (Haug 231).

Rāmarahasyopanishad, zu Anfang als Rāmatāpanam bezeichnet, in 5 Adhyāyāḥ. Hanumat belehrt Sanaka und andere Weise über die göttliche Natur von Rāma und die Art, wie er angebetet werden

soll. Vieles ist im Styl der Tantra geschrieben. Beginnt: सनकाद्या योगिवर्या अन्ये च ऋषयस्तथा । प्रह्लादाद्या विष्णुभक्ता हनुमन्तमथाब्रुवन् ॥ वायुपुत्र महाबाहो किं तत्त्वं ब्रह्मवादिनाम् । पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥ चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिके ऽपि च । सर्वेषु विद्यादानेषु विघ्नसूर्येषु (? सूर्येश IO.) शक्तिषु । एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल ॥ हनुमान्होवाच ॥ भो योगीन्द्राश्च ऋषयो विष्णुभक्तास्तथैव च । शृणुध्वं मामकीं वाचं भवबन्धविनाशिनीम् ॥ एतेषु चैव सर्वेषु तत्त्वं च ब्रह्म तारकम् । राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम् ॥

Rāma erwähnt gelegentlich die folgenden Schriften, die, späten Ursprungs, zum Theil noch erhalten sind: Rāmasahasranāman, Rāmaviçvarūpa, Rāmāshṭottaraçata, Rāmaçata, Rāmastavarāja, Sītāstava, Rāmashoḍaçākshari, Nṛisiṅhamantrarāja. Vgl. Catal. IO. 494, 71.

Skr. 122 b (Haug 249).

Çāṭhyāyanopanishad. Über das Verhalten des wandernden Bettlers (Parivrājaka) bei der Verehrung von Vishṇu. Beginnt: मन एव मनुष्याणां कारणं बन्धमोचयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ समासक्तं सदा (yadā Hs.) चित्तं जन्तोर्विषयगोचरे । यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बन्धनात् ॥ चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् । यच्चित्तस्तन्मना (mano Hs.) भवति गुह्यमेतत्सनातनम् ॥ नावेदविन्मनुते तं बृहन्तं नाब्रह्मवित्परमं प्रैति धाम । विष्णुक्रान्तं वासुदेवं विजानन्विप्रो विप्रत्वं गच्छते तत्त्वदर्शी ॥ Vgl. Catal. IO. 494, 118.

Skr. 122 b (Haug 221).

Çvetāçvataropanishad zum schwarzen Yajurveda gehörig. In 6 Adhyāyāḥ. Beginnt: ब्रह्मवादिनो वदन्ति । किंकारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठिताः ॥ Gedruckt in der Bibl. Indica, Calcutta 1850. Übersetzt von Deussen l. l. p. 288.

Skr. 122 b (Haug 245).

Saṃnyāsopanishad. Vgl. o. S. 114.

Skr. 122 b (Haug 238).

Sītopanishad. Sītā, die Gattin des zum Vishṇu erhobenen Rāma, ist die mystische Göttin, die nicht allein die Schöpfung selbst, sondern auch die Schöpferin alles Himmlischen und Irdischen darstellt. In der Mitte weicht der Verfasser von seinem Thema ab und bringt mit diesem nicht zusammenhängende Sachen vor. Beginnt: देवा ह

वै प्रजापतिमब्रुवन् । का सीता किं रूपमिति । स होवाच प्रजापतिः । सा सीतेति । मूलप्रकृतिरूपत्वात्सा सीता प्रकृतिः स्मृता । प्रणवप्रकृतिरूपत्वात्सा सीता प्रकृतिरित्युच्यते । सीता इति त्रिवर्णात्मा साक्षान्मायामयी भवेत् । विष्णुः प्रपञ्चबीजं च माया ईकार उच्यते । सकारः सत्यममृतं प्राप्तिः सोमश्च कीर्त्यते etc. Vgl. Catal. IO. 493, 50.

